No. १४९८

Title ग. काशिकाख्यायां लिंग कारकता

Author गदाधरः

Extent १३ Age ८

Subject न्याय वैशेषिकं

१३ पत्र

गदाधरी टीकायां काशिकाख्यायां लिंगकरणता

१४५८

लिंगकरणना

४ विशेषणेतदु ४

लिंगमभिन्नं तथे

ग·टी· ॥श्रीगणेशाय नमः॥ ॥व्यापकताज्ञानकारणतां निराकृत्य ननु परामर्शमानं लिंगमिति पूर्वोक्तं प्रसंगतः प्रपंचयति। मूले एवमिति। परामर्श

१ मात्रं ज्ञानमात्रं गादाधर्यां उपलक्षणस्यैव कार्याव्यवहितप्राक्क्षणे सत्त्व एव। परिचायकत्वप्रतिक्षेपे [redacted]

णा। उपलक्षणत्वानिराकरणेन लिंगमेवेति लिंगं विशेषणं नतु तादिनेमित्यर्थः। अत्रैव कारो भिन्नक्रमः तथा च लिंगं विशेषणमेवे

त्यस्य लिंगं नोपलक्षणमित्यर्थ इत्याशयेन शंकते नन्वेति। असंयतेरिति। इंद्रियसंयोगे पलक्षणत्वाभावादिति भावः। अत इत्युक्तं शंका मध्यस्थ परि

चायकत्वपदस्येति शेषः। तत्सामान्येति· विशेषणत्वोपलक्षणत्वान्यतरेण परिचायकत्वस्यावश्यकत्वादिति भावः·। उपलक्षणतया परिचाय

कत्वनिराकरणं परिचायके उपलक्षणत्वनिराकरणपर्यवसन्नं। अत्र तार्किकालंकारैः विशेष्यान्वयिना च यित्वं विशेषणत्वं यथा परामर्शान्वयि

हेतुतया च यित्वं। एवं नोपलक्षणतयेति दीधितेः नञा वर्त्तकांतरोपस्थापकतयेत्यर्थमभिधाय काकवंतो गृहा इत्यादावुपलक्षणत्वं आवर्त्तकांतरं। त

दुपस्थाप्य आवर्त्तकतया काकादिरुपलक्षणं परामर्शे च तथा लक्षणं तदभावाल्लिंगं न तथेति यदुक्तं तदेतन्न रुचिरं। तथा चेति मूलस्य तद भ्र

व वतादिकाया आशामंजस्यापत्तेः विशेषणतायाएव हेतुतान्वयरूपतया तदर्थं स्थापकत्वात् किंच विद्यमानं सद्व्यावर्त्तकं विशेषणं अवि

द्यमानं सद्व्यावर्त्तकमुपलक्षणमित्याशयेन ग्रंथः प्रणीतो नानागतलिंगस्य विशेषणत्वभंगो वर्णाविष्यते अनुमितिसमये विद्यमानताला रामः

भसंभवादिति स्वपंक्तं वृत्तोः उपदमभिधानीयत्वाद्यतथे न च दीधितिकृद्भिर्व्याख्यातं इत्युपलक्षणतयेत्यस्यार्थांतरमप्यनुचितमिति। तस्ये १

अविशेषणत्वे इति असिद्धिवारणाय लिंगस्याविशेषणतामात्रं न तु पक्षतावच्छेदकत्वमपि. तेनानुमितेः पर्वतो वह्निमानिति सिद्धेर्विरोधित्वान्निर्वाहः

तिविशेषणत्वमेवेति मूले स्वविशेषणतया परिचायकमेवेत्यर्थः नोपलक्षणतया परिचायकं। परामर्शे विषयितासंबंधेन अनुमिसम्बन्धितशाब्दस्य
णे सत्वादिति भावः। विशेषांतराभावे इति मूलं च विशेषांतरस्यैव विशेषणत्वमस्तु न लिंगस्येत्याशंकावारणाय। तत्वे इति तथा च दीधितौ पुनः शब्दो न
हेतुत्वानिर्वाहकमनन्यथासिद्धत्वमिति शेषः। मूले परिचायकतयेत्यस्यावच्छेदकतयेत्यर्थः। विशेषणतया परिचायकस्याप्यन्यथासिद्धत्वे इंद्रिया
देरपि तथात्वापत्तेरिति भावः। त्वादीति द्वितीयहेतौ विशेषणानां विशेषणसमानकालीनत्व विशेष्यविषयकत्वाशाब्दत्वानां विशिष्टबुद्धित्वं नि
र्विकल्पके व्यभिचारवारणार्थं॥ इति तत्वार्थः। किंचिदिति। अन्यतो लिंगस्यैवाजनकत्वात्। इत्यादीति द्वितीयहेतौ साध्यांशे धूमविशेषणिकात्तती ग ५
ये च समानकालीनत्वग्रहं विना धूमविशेषणिकेत्यर्थः। दृष्टांतविरोधेनेति। न चोद्देश्यतावच्छेदकविशिष्टे यद्विशेषणसमानकालीनत्वे न बुद्धिः
हेतुप्रविष्टा एवं च दंडीपुरुष इति प्रत्यक्षस्यासाज्ञापमानविशेष्यतावच्छेदकावगाहित्वेपि न विरोधः तस्योद्देश्ये विशेषणत्वाभावादिति वाच्यं। विशिष्ट
बुद्धिसामान्ये विशेषणज्ञानत्वेन हेतुतया विनिगमना[illegible] विरहाज्ज्ञापमानविशेषणत्वेनापि हेतुत्वमित्याशयेनेदं तन्मते प्रयोजनाभा
वे न तथा विवक्षणासत्वात्। विशिष्टप्रत्यक्षत्वावच्छिन्नं प्रत्येव विशेषणज्ञानत्वेन हेतुतेति मतानुरोधेन यद्यपीत्यादि उद्देश्यतावच्छेदकादिवि
वक्षणां अनुमित्युदाहरणं च। प्रत्यक्षे विशेषणज्ञानतया विशेष्यतावच्छेदकज्ञानस्य हेतुत्वादिति। धूमध्वंसस्येति धूमध्वंसवान्पर्वतो धूमका
लीनवह्निमानित्यनुमिति धूमध्वंसजन्यागोध्याउनीरितापत्तेरिति न च साक्षात्संबंधावच्छिन्नत्वं परंपरासंबंधानवच्छिन्नत्वं वा मुख्यविशेष्य

ग०टी०
२
2

तानिरूपितविशेषणतापर्याप्तवेश्यंपूरणाप्रयासापत्तेः। ननु मुख्यविशेष्यतानिरूपितविशेषणतासामानाधिकरण्यापन्नस्यैव हेतुघटकत्वसंभवादा
पन्नत्वाश्रयवैयर्थ्यमित्यत आह नन्विति। न च मुख्यविशेष्ये पर्वते यद्धि धूमस्य विशेषणतात्वं तदापन्नत्वं कुतो नेति वाच्यं। न ह्यत्र पर्वतपरतन्त्रधूम
स्य वह्नौ भानं किं तु कालपरतन्त्रस्येति मुख्यविशेष्ये विशेषणतापन्नतासंभवात्। विलक्षणसंसर्गेण विशेषणतांतद्विशिष्टतदवगाहि
त्वं तद्विशिष्टवैशिष्ट्यबुद्धित्वमिति निष्कृष्टमते धूमकालस्येव विशेष्यविशेषणतान्तरं धूमस्येसे तादृशविवक्षावैयर्थ्यस्त्वचनापाह इदं चेति। य
याप्तु तस्य विशेष्यनिष्ठनिष्ठत्वमात्राघटितस्य विशेष्यनिष्ठत्वेसति विशेष्यतावच्छेदककालावच्छिन्नवृत्तिकत्वस्य च। अन्यथैव यत्समानका
लीनत्वविशिष्टसंसर्गेणाधर्मीतरेत्यादिक्रमेणा अयं च हेतुतत्तोनोभविष्यति तत्कालं कारास्तु विशेष्यनिरूपितयद्धर्मनिष्ठविशेषणताप्रयुक्त
तद्धर्मसमानकालीनत्वावगाहित्वमर्थः तदानीं धूमतान्पर्वतो धूमसमानकालीनवह्निमानित्यादौ साध्यांशे विशेषणताप्रयुक्तमेव धूमसमा
नकालीनत्वावगाहित्वमित्याहुः। तेषां विशेषणे विशेषणतापन्नस्येवेत्यादिदीधितिग्रंथोऽलग्रकश्रुतिस्वेति। विधेयभानांशे धर्मितावच्छेदक
त्वनिवेशोपधिकं। नन्वेतावता धूमस्याधिकरणपक्षतावच्छेदकप्रवेशो व्यभिचारे नवार्यत इत्यत आह यद्धर्मधर्मितावच्छेदकीभूतस्येति। अथ स्वीयपदधर्मनिष्ठध
र्मितावच्छेदकतानिरूपिताया विधेयतातदवच्छेदकतापर्याप्त्यधिकरणत्वापन्नत्समानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छिन्नविषयताकत्वनिवेशा
न्नानुमितित्वं तस्मादाय दोष इत्यत आह समूहेति विधेयत्वेतीति। यद्विधेयत्वं तदवच्छेदकीभूतसमानकालीनत्वधर्मितावच्छेदकतापन्नधर्मावच्छिन्नं च यद्वि

रा०म०
२

षयित्वं एकविशेष्यतानिरूपितं तदुभयविषयताशाल्यशाब्दबुद्धित्वं हेतुरित्यर्थः। अनुमितौ विधेयताभेदेन विशेष्यताभेदमते नेदं अन्यथा एक
त्वद्वयमिति दीत्या तादृशानुमितिमादाय व्यभिचारो दुर्वारः। स्वानिरूपकेति। स्वानिरूपकज्ञाननिरूपितविधेयतावच्छेदकतापर्याप्त्यधिकरणं
यद्रूपं तत्समानकालीनत्वधर्मितावच्छेदकतापन्नं यद्धर्मनिष्ठधर्मितावच्छेदकताकतद्रूपावच्छिन्नविषयताकशाब्दबुद्धिर्यत्साज्ञापमानविशेष
णत्वमेतिव्याप्तिरित्यर्थः। तादृशविधेयतावच्छेदकतापन्नीभूततादृशधर्मितावच्छेदकतावच्छिन्नावच्छेदकताकविषयितेति यावत्। स्व
चरमविषयता। स्वानिरूपकज्ञानानिरूपितत्वनिवेशात् धूमवान् पर्वतो वह्निमान् धूमकालीनवह्निमांश्चेति आलोकादिलिंगकानुमितौ न व्यभि
चारः इत्याह तत्समूहेति तदीयधूमसमानकालीनवह्नित्वावच्छिन्नविधेयतारूपविषयतायाः स्वानिरूपकज्ञानानिरूपकत्वेपि तदवच्छेदकतापर्याप्त्य
धिकरणं न समानकालीनत्वधर्मितावच्छेदकतापन्नमिति तादृशविधेयतावच्छेदकताव्यापकयत्समानकालीनत्वधर्मितावच्छेदकतावच्छिन्नाव
च्छेदकत्वाभावात्। तदीयशुद्धवह्नित्वावच्छिन्नविधेयतारूपविषयतायाश्च समानकालीनत्वधर्मितावच्छेदकतावच्छिन्नावच्छेदकताकत्वविर
हेण स्वपदेनोपादानासंभवात् पूर्वोक्तविषयताया उपादाने स्वानिरूपकज्ञाननिरूपितत्वेन तत्र हेत्वभावादित्यर्थः। स्वानिरूपितेति निरूपकमात्रनि
रूपितत्वे हेतुगर्भे उद्देश्यतावच्छेदकतारूपधूमकालीनवह्नित्वावच्छिन्नविषयतारूपं यत्स्वं तस्य तदनिरूपकानिरूपितविधेयतावच्छेदकताव्यापक ६३
समानकालीनत्वधर्मितावच्छेदकतावच्छिन्नावच्छेदकताकत्वादिति भावः। परस्येति। अन्यथा व्यभिचारो वश्यते। अविशेषणेनेति स्वातंत्र्येणेति

ग॰टी॰ वाधारः। एतन्मतेपि विधेयताभेदे विशेष्यताभेदः अन्यथा एकत्रद्वयमिति रीत्या धूमवत्त्वेन वह्निधूमकालीनवन्ह्युभयानुमितावालोकलिंगिका
२ यां व्यभिचारः। अत्रैतादृशरीत्यायत्तुमतं परिष्कर्तुं मीमांसामहे तथाहि स्वनिरूपकविशेष्यतानिरूपितविधेयतावच्छेदकताव्यापकयत्समानकाली
नत्वधर्मितावच्छेदकत्वावच्छिन्नावच्छेदकताकयद्धर्मनिष्ठधर्मितावच्छेदकताकविषयताकाशाब्दबुद्धित्वं हेतुः तत्र धूमवानयं धूमकालीनवह्निमा
3 न् पर्वतो वह्निमानालोकादित्यादौ धूमकालीनवह्नित्वावच्छिन्नविषयताशुद्धवह्नित्वावच्छिन्नविधेयतयोरेकधर्मितानिरूपितत्वसत्त्वेन तादृशवह्निनि
ष्ठधर्मितावच्छेदकतारूपविषयतायाः स्वपदेनोपादानसंभवाद्व्यभिचार इति तद्वारणार्थं यद्धर्मविशिष्टेत्यावश्यकं। न च तदुपादानेपि तादृशविषयता
यां धूमनिष्ठावच्छेदकतानिरूपकधर्मितानिरूपकत्वसत्त्वेन व्यभिचारो न वार्यत इति तद्वैयर्थ्यं दुर्वारमिति वाच्यं। तत्पदेन यद्धर्मनिष्ठावच्छेदकनिरूप
कविशेष्यतात्वावच्छिन्ननिरूपितत्वस्य विवक्षितत्वात्। उक्तविषयतायां च वह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यतात्वावच्छिन्ननिरूपितत्वस्य
वोपगमात्। अथ लाघवेन विषयतायां विशेष्यतावच्छेदकताभेदस्यैव निवेशे नोपपत्तेः यद्धर्मविशिष्टेत्यस्यानतिप्रयोजनत्वमित्यत्र दूषणता
त्पर्यं। अस्माकं तु धर्मितावच्छेदकताभेदनिवेशो वितत्र शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसमानकालीनवह्नित्वावच्छिन्नविषयतायां धर्मि
तावच्छेदकताभिन्नायाः स्वपदेनोपादानसंभवात् हेतुसत्त्वेन व्यभिचार इति यद्धर्मविशिष्टेत्यस्य न वैयर्थ्यं अथैकविषयतानिरूपितत्वकस्यैव तत्र धूम
वह्निधूमसमानकालीनवह्नीनां त्रयाणां शुद्धपर्वतत्वावच्छिन्ने विशेषणतया वह्नेरुद्देश्यतावच्छेदकतात्र वह्नित्वावच्छिन्नविधेयत्वसमानकालीन एम॰
वह्नित्वावच्छिन्नविषयतयोरेकविशेष्यतानिरूपिततया व्यभिचार इति यद्धर्मविशिष्टेत्यस्य सार्थकमिति चेन्न। उद्देश्यतावच्छेदककोटिप्रविष्टवत्त्व ३

नांविधेयतानुगमादिति चेन्नाधर्मितावच्छेदकताभेदनिवेशे पद्धर्मविशिष्टेत्यस्य सार्थक्येऽपि स्वमतेन तत्सार्थक्यार्थगुरुमार्गानुसरणान्नौचित्यात्।य
यासन्निवेशेऽस्मन्मतेऽपि सार्थक्यादिति। वस्तुतस्तु अतिलाघवेन विषयतेकमेव विवक्षणीयं तादृशविषयताया विधेयतात्वादिति भवतामपि सा
ध्यानपद्धर्मविशिष्टेत्यस्य स्ववैयर्थ्यं अतएव विधेयतत्वतादृशविषयत्वयोरैकांस्यत्वात् एकविषयतानिरूपितत्वमुक्तमिति। किंचिद्धर्मेति। इदमत्रबो
ध्यं यत्किंचिद्धर्मविशिष्टविशेषणत्वस्य पद्धर्मआवश्यकत्वे धर्मपदस्य दार्थान्तर्भावो विफलः। नच समानकालीनत्वादिशियस्य दार्थानिवेशादिह आ
वश्यकः अन्यथा नियमशरीरानुपपत्तेरिति वाच्यं। तथा सति धूमवान् पर्वतो वह्निमान् आलोकादिसाद्दोषव्यभिचारापत्तेः समानकालीनत्वादिशिपस्य
दार्थान्तर्भावस्यावश्यकत्वात्। पर्वतत्वावच्छिन्नविशेषणतापत्तेरिति। तथा च धूमवद्धूमसमानकालीनवह्निमत्पर्वतो वह्निमानित्याकारे वान्यलिंगका
नुमितिस्तत्रेत्यर्थः। संग्रहायेति। अन्यथा तत्र लिंगजन्यत्वासिद्ध्यापत्तेः। पक्षाद्बहिरिति। उक्तसाध्ये उक्तहेतुसमानकालीनत्वग्रहाजन्यत्वे न पक्षो
विशेषणीय इति भावः। अर्थविशेषलाभार्थत्वेन वैयर्थ्याद्यासंभवादाह वस्तुतस्त्विति। अबाधादिति निरुक्तसमानकालीनत्वविशिष्टप्रतियोगिक
त्वेन संबंधत्वे तु भ्रमत्वोपपत्तावपि गौरवं लाघवेन निरुक्तसमानकालीनत्वविशिष्टसंबंधस्यैव विधेयसंबंधत्वसंभवादिति भावः। वैलक्षण्यात्तासामंजस्य
मिति। साध्यसमानाधिकरणधूमाधिकरणतावच्छेदककालावच्छिन्नपक्षकस्थलमेव नातीति बोध्यं। अत्र धूमालोकादिपरामर्शानां परस्परव्यभिचा
रवारणाय कारणमवह्नितोऽनरत्वनिवेशे गौरवाल्लिंगविषयतायाः कार्यतावच्छेदकत्वमाचार्यैरूपेतं। तत्र वह्निव्याप्यधूमपरामर्शतानिरूपितपक्षवि

शेष्यताश्रयालिनिश्चयत्वावच्छिन्ननिरूपितकार्यतावच्छेदकं न धूमप्रकारकपर्वतोद्देश्यकवन्त्यनुमितित्वं। वह्निव्याप्यधूमवन्महानसं वह्नि-
व्याप्यालोकवांश्च पर्वत इति ज्ञानजन्यायां धूमवन्महानसं व्याप्यालोकवत्पर्वतश्च वह्निमदित्यनुमितौ व्यभिचारात्। नापि धूमविशिष्टपर्वतो-
द्देश्यकत्वगर्भ्यतः शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभावाप्रकारकत्वरूपं निश्चयत्वं निवेश्यं तत्र शुद्धत्वानिवेशे नील-
पर्वतो वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्यधूमवानिति ज्ञानस्य निश्चयत्वानुपपत्तेः। एवं च नीलपर्वतो वह्निव्याप्यधूमवान्न वेति संशयाद्धू-
मवान्पर्वतो वह्निमानित्यनुमित्यापत्तिरतः शुद्धपक्षविशेष्यकत्वगर्भं दलांतरं वाच्यं। तथा च वह्निव्याप्यालोकवान्पर्वतो वह्निव्याप्यधूमवानिति प-
रामर्शजन्यायां धूमवानालोकवान्पर्वतो वह्निमानित्यनुमितौ व्यभिचारः। न च कार्यतावच्छेदककोटावपि धूमान्यपर्वतत्वान्यानवच्छिन्नत्वं पक्षविशेष्य-
तायां निवेश्यमिति न व्यभिचार इति वाच्यं। तथापि पर्वते कत्वद्वयमिति रीत्या धूमपर्वतत्वोभयं धर्मितावच्छेदकीकृत्य धूमपरामर्शात्तज्जन्यायां धूमवान्
धूमवान्पर्वतो वह्निमानित्यादौ व्यभिचारादिति। अत्राहुः वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वान्यधर्मानवच्छिन्नविशेष्यतानिरूपितवह्नित्वाव-
च्छिन्नविधेयताशालित्वमनुमितित्वं तत्। न च तादृशानुमितेः विशेष्यतायां पर्वतत्वान्यधूमावच्छिन्नत्वादसंभव इति वाच्यं। तादृशधर्मावच्छिन्नत्वविशिष्टवि-
शेष्यतात्वानवच्छिन्नधूमप्रकारतानिरूपितत्वस्योक्तत्वात्। न त्वन्यपर्वतत्वान्यधर्मावच्छिन्नविशेष्यतात्वरूपेण धूमप्रकारतानिरूपितत्वसंभवः
तथा सति धूमवान् धूमवान्पर्वतो वह्निमानित्यनुमित्याकारापत्तेः। एवमेकत्र द्वयमिति रीत्या धूमपर्वतत्वोभयधर्मितावच्छेदककपरामर्शजन्योक्ता-

नुमितावपि न व्यभिचारः। नापि वह्निव्याप्यधूमवदन्योन्याभाववानितीमार् बाधसत्वे आलोकपरामर्शजन्यायामालोकवान् तादृशधूमवान् पर्व
तो वह्निमानित्यनुमितावपि व्यभिचारः। तत्रालोकावच्छिन्नविशेष्यतात्वेन धूमप्रकारतानिरूपितत्वोपगमात्। न च धूमपरामर्शसत्वेपीतपर्वता
न्योन्याभाववानितीतरबाधाधीनधूमवान्पीतपर्वतो वह्निमानित्यनुमितेस्तादृशपरामर्शी कार्यत्वादुपपत्तिरिति वाच्यं। तत्र धूमपीतत्वयोरेकत्र
द्वयमिति रीत्या वह्निधर्मितावच्छेदकत्वमात्रमुपेयते नतु पीतत्वस्य धूमधर्मितावच्छेदकत्वमिति पर्वतविशेष्यताया धूमप्रकारतानिरूपकतायाः
पर्वतत्वान्यधर्मावच्छिन्नविशेष्यतानवच्छिन्नत्वोपपादनादिति। वस्तुतस्तु ग्रंथकारमते प्रतिबध्यप्रतिबंधकतावच्छेदकभावापन्नविषयताद्व
यवदन्यत्वं निश्चयत्वं शेषं बुद्धिमद्भिरूह्यं। इदं त्ववधेयं उत्सन्निवादग्रंथालोके लिंगांशे व्याप्यत्वमात्रं पक्षधर्मिस्त्रेरमिति तं तत्र्यासेनोनाविषत
याविनिगमनाविरहेण तत्तद्व्याप्यत्वावगाहिपरामर्शानां हेतुत्वे कारणाभाववह्निनोत्तरत्वनिवेशाभपेन माप्तिविषयकत्वं फलस्योपेयमिति न युक्तं
। लाघवेन साध्यांशेताभानववदवृत्तित्वस्यैव व्याप्तितात् तद्व्याभाववदवृत्तिधूमवान्पर्वत इति परामर्शात् समवायसंबंधावच्छिन्नवन्ह्यभाववद्वृत्ति
त व्याप्तिविषयकपरामर्शाच्च संयोगेन पर्वतादौ वन्ह्याद्यनुमितिवारणाय समवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितसंयोगसं
बंधावच्छिन्नप्रतियोगिताकसंबंधावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानिरूपितेत्यादिक्रमेणानिरूप्यनिरूपकभावापन्नविषयतानांकारण
तावच्छेदकत्वे लाघवात् तस्याप्यवदन्यावृत्तित्वस्यव्याप्तित्वे द्व्यवदन्यावृत्तिधूमवान् समवायेन वह्निमदन्यावृत्तिधूमवानिति परामर्शाद्व्यावर्त्तक

ग.टी.

५

5

तथाविधविषयतानां निवेशे गौरवात् संयोगादिसाध्यकसद्धेतुपरामर्शप्रमात्वाभिमाने तु साध्यवदन्यावृत्तित्वमेव लाघवाद्व्याप्तिरिति। अत्र
वदंति अनुमितौ व्याप्तिभाने परामर्शस्य स्वातंत्र्येण हेतुत्वं न कल्पनीयं विशेष्यतावच्छेदकप्रकारकनिर्णयमुद्रयैव हेतुतोपपत्तेः। न चैवं वह्नि
व्याप्यधूमवान् पर्वत इति तादृशनिर्णयोत्तरं घटव्याप्यवत्ताज्ञानात् सत्वे तादृशधूमवान् पर्वतो घटवानित्याद्यनुमित्यापत्तिरिति वाच्यं। तादृशानुमिति
त्वस्य कस्यापि कार्यतानवच्छेदकतया आपादनासंभवात्। न च विशाधयिषाविरहविशिष्टवह्निव्याप्यधूमवान् पर्वतो घटवानिति सिद्ध्यभाव एवा
पादक इति वाच्यं। आचार्यमते तादृशानुमित्यप्रसिद्ध्या तादृशसिद्ध्यभावस्याहेतुत्वात्। न च वह्निव्याप्यधूमवान् पर्वतो घटव्याप्यवान् इति पराम
र्शाधीनां वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्यनुमितिः तत्रेच्छाविरहविशिष्टवह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानि
तिसिद्ध्यभावो हेतुः स एव तत्रापादक इति वाच्यं। वह्निव्याप्यधूमघटव्याप्योभयावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यकवत्यनुमितित्वस्यैव तादृशसि
द्ध्यभावकार्यतावच्छेदकतया तच्छून्यत्वेन तदापादनासंभवात्। न चैवं दर्शिततसिद्धिदशायां घटव्याप्यवान् पटव्याप्यवान् वह्निव्याप्यधूमवान् पर्वतो
घटवानित्यनुमित्युत्पत्त्या व्यभिचारेणोक्तधर्मः कार्यतावच्छेदकः किंतु घटव्याप्यवह्निव्याप्यधूमपर्वतत्वेतत्त्रितयातिरिक्तधर्मानवच्छिन्नविशेष्यता रि
कघटानुमितित्वमेव तथा चोक्तापत्तिर्दुर्वारैवेति वाच्यं। तथापि वह्निव्याप्यधूमवान् घटव्याप्यवान् पर्वतो घटवानित्येतादृशसिद्ध्यभावेन फलजनने वह्निव्या राम.
प्यधूमवान् पर्वतो घटव्याप्यवानिति परामर्शस्य सहकारितयैवोक्तापत्तिवारणात्। तथा चानुमितौ व्याप्तिभाने परामर्शस्य स्वातंत्र्येण हेतुत्वाकल्पनप्रयुक्त ५

लाघवमक्षतमेव। यदि चैकधर्मिविशेष्यकपरामर्शाद्धर्म्यंतरेनानुमितिः प्रामाणिकी तदा विशेष्यतावच्छेदकप्रकारकनिर्णयस्यापि धर्मितां त्रा १
निवेशेपि वा हेतुतानान्यथापरं तु पर्वतनिष्ठसामानाधिकरण्येन वह्निव्याप्यवत्तापरामर्शत्वावच्छेदेनानुमित्यापत्तिवारणायावच्छिन्नसंयोगघटित
व्यापकतावगाहिमहत्संयोगघटितव्यापकताघटितव्याप्तिविशिष्टहेतुप्रकारकावच्छिन्नसंयोगसंसर्गकपरामर्शयोरन्यतरस्य सहकारित्वे सि
कार्यविधेयताचसिद्ध्यभावकार्यतावच्छेदिकेवेति न तदनुपपत्त्यापरामर्शस्य हेतुताप्रसंगः। वह्निमान्पर्वतो घटवानित्यादौ सिद्धेरविरोधित्वात्म
णिकारमतेपि विधेयतायाः पक्षतावच्छेदके निवेशितत्वात्। केचित्तु अनुमित्तौ व्याप्तिभानानुपगमेप्येकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या वह्निव्याप्य
धूमपर्वतत्वोभयं धर्मितावच्छेदकीकृत्य वह्निव्याप्यधूमप्रकारकस्य वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानिति परामर्शस्य वह्निव्याप्यधूमवान्पर्व
तो वह्निमानित्यनुमितिप्रतिष्ठ्यकारणत्वकल्पने गौरवं मन्मते तु शुद्धपर्वतत्वावच्छिन्नधर्मिकवह्निव्याप्यधूमपरामर्शहेतुतयैवोपपत्तिरिति ला
घवं। न च तथाविधपरामर्शात्तादृशानुमितिस्वीकारे चिंतामणिकारमताविशेषइतिवाच्यं। तादृशस्थले तदविरोधस्याचार्यैरुपगमात्। यत्तु तन्मया
स्वभाने वह्निव्याप्यालोकवान्पर्वत इति परामर्शसत्त्वे वह्निव्याप्यधूमवत्पर्वतान्यो निर्वह्निरितीतरबाधसत्त्वे वह्निव्याप्यधूमपर्वतत्वोभयं धर्मितावच्छेदकी
कृत्य वह्निविधेयकानुमित्युपपत्तेस्तादृशानुमितौ तादृशेतरबाधस्य स्वातंत्र्येण हेतुत्वं वाच्यं तदंगीकारे तु तादृशायां वह्निव्याप्यधूमप्रकारकपर्वत
विशेष्यकनिर्णयस्यावश्यकतया ततएव तादृशानुमित्युपपत्तेस्तादृशेतरबाधस्य न तथा हेतुत्वं कल्पनीयमिति लाघवमिति तन्न पक्षमुख्य·

ग॰ टी॰ ६ विशेष्यकसंशयपरामर्शस्य हेतुता तत्र व्याप्तिभाने तादृशेन रूपेणाबाधस्य तत्तद्धेतुतायाम् आवश्यकत्वात्। मुख्यत्वात् निवेशो वह्निव्याप्यधूमवत्पर्वतवा
न्दे शादृशसाध्यनंताह्यप्यमुक्तिभेदकूटनिवेशप्रसंगेन महागौरवात्। एतदपेक्षया ऽस्मत्प्रेतरूपेणाबाधप्रकीर्णानां हेतुत्वौचित्यात्। अत एव पाकानुमानेऽपि
6 श्रेः पक्षमुख्यविशेष्यकपरामर्शस्यैव हेतुत्वं दर्शितं। प्रदर्शितव्याप्तिभाने धूमलिंगकानुमितिं प्रति अनुमित्साविरहविशिष्टप्रत्यक्षेच्छाविशि
ष्टायाः वह्निव्याप्याभाववान् पर्वतो घटवानिति विशिष्टवैशिष्ट्यप्रत्यक्षसामग्र्याः पृथक् प्रतिबंधकत्वं न कल्प्यते तादृशसामग्रीकाले पर्वतो वह्नि
व्याप्याभाववानिति विशेष्यतावच्छेदकवत्तानिर्णयस्य तद्विरोधिन आवश्यकत्वात्। तदभावेन तादृशनिर्णयस्य धूमवान् पर्वतो वह्निमानित्यनु
मित्सप्रतिबंधकतया तत्सत्त्वेः स्वतंत्रप्रतिबंधकत्वे गौरवमिति तदपि नाऽनुमितौ व्याप्यभानेऽपि धूमवान्पर्वतो वह्निमानित्यनुमितौ तादृशसाम
ग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेऽपि विरहात् वह्निव्याप्यधूमवद्द्रव्यमित्यादिपरामर्शजन्यानुमितौ तादृशप्रत्यक्षसामग्र्याः पृथक् प्रतिबंधक
त्वे गौरवभयेन द्रव्यत्वादिधर्मितावच्छेदकनिवेशधूमप्रकारता निरूपितधर्मितावच्छेदकतासंबंधेनैव त्वन्मतेऽनुमितिं प्रति स्वीयानुमितिनिष्ठविशे
ष्यता निरूपितविशेष्यताकत्वप्रकारतानिरूपितावच्छिन्नत्वप्रकारतानिरूपितप्रकारतासंबंधावच्छिन्नप्रतियोगिताकानुमित्साभावविशिष्टप्र
त्यक्षेच्छाविशिष्टतथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनात् तादृशप्रत्यक्षसामग्रीदशायां धूमवान्पर्वतो वह्निमानित्याद्यनुमितेरपि वारणसंभ राम॰ ६
वात्। न चैवमपि कारणतया। विशिष्टविशेष्यतावच्छेदकप्रकारकनिर्णयरूपसामग्र्या अभावः पर्वतत्वे सर्वदैवास्तीति वाच्यं एककालीनत्वेसंबं

(कर्त्तितान्तविशिष्टत्वं प्रविधेस्त्वेन्यपुः)

धेनज्ञप्ताविपसामग्र्याः विरोधित्वोपगमात्। कार्यकारणोभयदिशि तत्तद्रूपीयत्वं निवेश्यं तेन प्रत्यक्षान्तरोपानुमितौ न प्रत्यक्षान्तरीयसामग्र्याः प्रति
बंधकत्वापत्तिः। तत्तद्रूपीयत्वादेरपि धूमितावच्छेदकतया तन्निष्ठप्रत्यासत्तिकत्वे प्रत्यक्षभेदभिन्नकारणतापाश्रावश्यकतया पर्वतत्वादिभेदेन प्र
तिबंधकतानानाधिकात्। एतदपि तन्नव्यास्यमाने अवच्छिन्नसंसर्गघटितव्यापकतावगाहि शुद्धसंयोगेन धूमवत्तावगाहि परामर्शशुद्धसंयोग
घटितव्यापकतावगाहि अवच्छिन्नसंयोगेन धूमवत्तावगाहि परामर्शयोः परस्परजन्यानुमितौ व्यभिचारः। न च यत्र शुद्धसंयोगघटितव्यापकतापरा
मर्शस्तत्रावच्छेदकावच्छेदेनानुमितिर्नेष्यते इति वाच्यं। तथा सति यदि च तत्स्लिंगपरामर्शादपि भ्रमानुमितिरिति ग्रंथेन शुद्धसमवायसंबंधघटि
तव्यापकतावगाहि गंधप्रागभावकालावच्छिन्नघटपक्षकसमवायसंसर्गकपृथिवीत्वादिहेतुकपरामर्शजन्यतादृशकालावच्छिन्नसमवायसं
सर्गकभ्रमात्मकगंधानुमितावतिव्याप्तिवारणासंगतेः। अन्यथा तु स्वप्रयुक्ता तादृशपरामर्शादपि अवच्छेदकावच्छेदेन भ्रमानुमितेरनुदयात्तादृश
प्रयासानर्थक्यं स्यादिति। न च संयोगावच्छिन्नसंयोगे संयोगत्वेनानुगमय्यैकैव कारणता कल्प्यतामिति न व्यभिचार इति वाच्यं। अवच्छिन्नसंयोगघ
टिताप्रामाण्यग्रहकाले तद्घटितव्यापकतापरामर्शाच्छुद्धसंयोगघटिताप्रामाण्यग्रहकाले तद्घटितव्यापकतावगाहिपरामर्शाच्चानुमितिवारणा
य विशिष्य तेषामुत्तेजकत्वं स्वीकृत्य विशिष्य विशिष्य तथाविधपरामर्शयोरेकाकारानुमितिप्रसवहेतुताया वक्तव्यत्वायातात्। एकत्र तादृशाप्रामा
ण्यग्रहयोरुत्तेजकत्वेऽपि एकसंसर्गघटिताप्रामाण्यग्रहकाले परसंसर्गघटितव्यापकतापरामर्शादनुमित्यनुदयापत्तेः। अस्मन्मते चावच्छिन्नसंयोग

८

ग॰टी॰ ७ घटितव्यापकताज्ञानजन्यानुमितौ तद्घटितव्याप्तिरेव गुणसंयोगघटितव्यापकताज्ञानजन्यानुमितौ तद्घटितव्याप्तिरेव च भासत इति न परस्पर
व्यभिचार इति तद्व्यपेक्षालं। हेत्वाभासग्रन्थे पक्षतावच्छेदकैकदेशव्यापकत्वावच्छिन्नत्वस्य संसर्गतायां वक्ष्यमाणतया पर्वतत्वावच्छेदेन धूमप
रामर्शात्तादृशधूमस्थले सोपपत्तेश्चत्वात्। अवच्छिन्नसंयोगेन व्यापकतावगाहिपरामर्शानुसंयोगवत्त्वस्यावच्छेदकीभूतपर्वतत्ववत्त्वोभयसंब
धेन वह्निविधेयानुमितेरुपगमेन व्यभिचारस्वारस्यादीदृशयुक्तिबलेन व्याप्तिभानसाधनासंभवात्। हरिरामभट्टाचार्याणां विपरीतफलत्वसाद
नं तु अग्निमद्ग्रन्थविरुद्धमिति द्रष्टव्यं। परे त्वाचार्याणां तत्र व्याप्तिभानानुपगमे तेजोव्याप्यधूमवान्पर्वत इति परामर्शकाले वह्निभिन्नतेजोऽभाववा
न्पर्वत इतीतरबाधाधीनायां धूमवान्पर्वतो वह्निमानित्यनुमितौ व्यभिचारात् वह्निव्याप्यधूमवत्तापरामर्शहेतुतासंभवः मन्मते तु तादृशबाधस्थली
यानुमितेः तेजोव्याप्यधूमवान्पर्वतो वह्निमानित्याकारतया वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितौ तस्य हेतुतानिर्वाहः। यदि चेतरबाधा
धीनतादृशानुमितौ वह्नित्वमिव तेजस्त्वमपि भासते व्यापकतावच्छेदकत्वेन भानस्येव विधेयतावच्छेदकत्वेन भाननियामकत्वात्तथा च व्याप्तेरभा
नेपि न व्यभिचारः तत्र वह्नित्वे विधेयतावच्छेदकत्वानुपगमेन तादृशपरामर्शस्य वह्नित्वावच्छिन्नविधेयकानुमितिहेतुत्वोपगमादित्युच्यते तदा
पि तादृशानुमितौ वह्नित्वस्यापि विधेयतावच्छेदकत्वोपगमे बाधकाभावः तथा सति तेजस्त्वविशिष्टवह्निव्याप्यवह्निभिन्नतेजोऽभाववत्पर्वतकाली रम॰ ७
न तेजोव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य तेजस्त्वविशिष्टवह्निमान्पर्वत इत्यनुमितिं प्रतित्वात्तदंशेन हेतुत्वं न कल्प्यते तादृशपरामर्शकाले

तथाविधे तद्बाधकालीनतेजोव्याप्यधूमवान्पर्वत इति परामर्शस्यावश्यकतया तद्बलाद्वह्नित्वतेजस्त्वोभयावच्छिन्नविधेयताकानुमितिनिर्वा
हात्। वह्नित्वस्य विधेयतावच्छेदकतानुपगमे तु तदुभयावच्छिन्नविधेयताकानुमितेरनुभवसिद्धाया निर्वाहाय तादृशपरामर्शस्य पृथक्कारणता
त्वे महागौरवापत्तेः। न चैवमपि शुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वमेव तादृशपरामर्शकारणतावच्छेदकमतो न व्यभिचार इति वाच्यं।
तथापि तेजस्त्वविशिष्टवह्नित्वावच्छिन्नविधेयताकानुमितौ तेजस्त्वविशिष्टवह्नित्वावच्छिन्नव्याप्यधूमवत्तापरामर्शस्य व्यभिचारवारणार्थमनु
मितावाचार्यैस्तत्तिभानोपगमादित्याहुः। अनुभवादिति। लिंगस्य समानकालीनत्वभानानुपगमे च वह्निव्याप्यालोकवान्पर्वत इति परामर्शो
द्वह्निव्याप्यधूमवदन्यो निर्वह्निरिति ज्ञानदशायां वह्निव्याप्यधूमवान्वह्निव्याप्यालोकवान्पर्वतो वह्निमानित्यनुमितौ धूमपरामर्शस्य व्यभिचारः।
धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकवह्निविधेयताकानुमितित्वस्य सत्त्वात्। न च धूमेतरप्रकारत्वानिरूपितत्वमपि पक्षविशेष्यतायां
निवेश्यं तथा सति वह्निव्याप्यधूमवान्पर्वत इति परामर्शजन्यायां वह्निव्याप्यालोकवदन्यो निर्वह्निरिति बाधधीनानुमितेर्धूमजन्यत्व उक्ताकारतया अ
कार्यत्वापत्तेः अस्मन्मते तु पर्वतत्वान्यधर्मानवच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतापन्नधूमनिष्ठकालीनत्वसंबंधावच्छिन्नप्रका
रताकवह्निविधेयताकानुमितित्वं धूमपरामर्शकार्यतावच्छेदकं। एवमालोकादिपरामर्शकार्यतावच्छेदकं बोध्यं। कालीनत्वसंसर्गावच्छि
न्नप्रकारतापरामर्शनियम्यैवेति धूमालोकपरामर्शादितः धूमालोकादिघटितादृशप्रकारतासिद्धिरिति न व्यभिचाराकार्यत्वापत्ती। एवं धूम

ग॰टी॰ ८ ४ परामर्शसत्त्वेऽपि तत्पर्वतान्नो निर्वह्निरिति तत्र बाधाधी[illegible]न वह्निव्याप्यधूमवानपि तत्पर्वतो वह्निमानित्यनुमितेऽपि तत्त्वधूमधर्मितावच्छेदकत्वा
भावात् धूमपरामर्शकार्यताभंगः। पर्वतत्वान्यधर्मावच्छिन्नविशेष्यताकत्वात्। नाप्येकत्र द्वयमिति रीत्या वह्निव्याप्यधूमपर्वतत्वोभयधर्मिता
वच्छेदककधूमपरामर्शाज्जातायामनुमितौ व्यभिचारः तत्र धूमेऽपि वह्निधर्मितावच्छेदकतासत्त्वात् प्रसक्तावच्छेदकत्वेऽपि विशिष्टधूमप्रकारता
याः कालीनत्वसंबंधावच्छिन्नतादृशतत्प्रकारताया लिंगसंबंधावच्छिन्नत्वेऽपि तन्निरूपितविशेष्यतायाः पर्वतत्वान्यधर्मावच्छिन्नत्वात्।
न द्वितीयः प्रतिबंधकत्वप्रसंगादिति। यत्तु कालीनत्वसंबंधेन धूमोऽत्र वह्निरिति ज्ञानस्य प्रतिबंधकत्वापत्त्याऽनुमित्यनुपपत्तिरिति तन्न। तन्मते धूमाभाव
वान्पर्वत इति ज्ञानस्यानुमितिप्रतिबंधकत्ववदेतस्यापि प्रतिबंधकतायाः इष्टत्वात्। लिंगरूपेति। अतीतलिंगकालीनत्वावगाहित्वेन प्रसक्तानुमि
त्यादिसाधारण्यादि॥ तदानीं धूमवान्पर्वतो धूमकालीनवह्निमान् धूमध्वंसादित्याद्यनुमितौ व्यभिचारवारणाय स्वावगाहितयाकृष्टत्व विद्यमानेति॥ विशे
षणांतरं प्रथमे विशेष्ये विशेषणाभावाद् अपि तत्त्वं द्वितीये पक्षे धर्मविशिष्टविशेष्यकत्वं तृतीये तत्समानकालीनत्वग्रहाजन्यत्वं। इत्यादौ स्वाद्धिना विरो
धिज्ञानाभावस्य समानकालीनत्वभानमप्रयोजकत्वे ज्ञायमानविशेषणाजन्यत्वेन विशेषणाकालवृत्तितया विशेष्यमाननेयत्वमिति मूलासं
गतिपरिग्रहः। अतीतादिलिंगज्ञानानानुमितिरिति स्पष्टदूषकतया मूलं व्याचष्टे मूलेइति स्वव्यापारस्येव संभिधानं तु अतीतादिलिंगजन्यस्य प रा॰म॰ ८
रामर्शस्य नियताव्यवहितपूर्ववर्तित्वशंकावारणाय। तस्य तादृशलिंगकालीनतया तद्विरहएवेति भावः। अज्ञायमानलिंगांतरेति। अथ लिंग

रूपकारणाबाधात्समानकालीनत्वावगाहिनीनानुमितिरिति दीधित्यर्थं प्रदर्श्य समानकालीनत्वानवगाहिनीमनुमितिर्भवतु नवोभयथापि
न पक्षतेत्यत्र सिद्धिरिति मतं तन्निष्कर्षो वस्तुतो धूमवान्वह्निमानित्यनुमितित्वस्य मानाधिकरण्येनैव लिंगजन्यतासाधनाद्वेत्वसिद्धिशंकां दिशति तथा च १२
कथमुन्मत्तप्रलापइवायं ग्रंथः संगच्छते इति चेन्न यतः साध्यांशे कालीनत्वसंबंधेन मानएव लिंगस्य पक्षविशेषणत्वं किंवा ऽभावे पि नाद्यः यतः
तत्र तथाभाने विशेषणाजन्यत्वं प्रयोजकं वाच्यं तच्चातीतादिलिंगज्ञानाधीनानुमितौ दुर्घटं अत एतत्र पक्षविशेषणतया पि लिंगस्याभाने सर्वं
त्रापि पक्षविशेषणतया पक्षतानवच्छेदकलिंगभानमप्रामाणिकं न द्वितीयः विशेषणाजन्याया अप्यनुमितेः भवद्भिः स्वीकारे तथाविधानु
मितित्वावच्छिन्नं प्रति अतीतादिलिंगपरामर्शाणां विशेषणाजन्यानुमितिस्वीकारे पक्षविशेषणतायत्तकालीनत्वसंबंधावच्छिन्नलिंगविध
यतानिरूपितप्रकृतसाध्यविधेयताकानुमितित्वावच्छिन्नं प्रति विद्यमानलिंगपरामर्शाणां च विशिष्यकारणत्वस्वीकारे गौरवात्तथापि पक्ष
विशेषणतया लिंगभानोपगमासंभवात् वक्तृतत्तत्परामर्शानामनुमितौ पृथक्कारणताकल्पनमेव नास्ति पर्वतो वह्निव्याप्यधूमाभाववान्स्या
दित्यापत्तिं यति पर्वतो वह्निव्याप्यधूमवानित्यापाद्यव्यतिरेकनिर्णायस्य हेतुत्वे ऽव्यवहितोत्तरत्वसंबंधेन तादृशानिश्चयविशिष्टज्ञानत्वावच्छिन्नं
प्रत्येवमणिकारमतेना दृशज्ञानत्वेन हेतुताकल्पनेइति नगौरवं आचार्यमते तादृशापत्तिं प्रति तादृशानिश्चयपदस्य पृथक्कारणतायाआव
श्यकत्वात् एतेन मणिकारमते धूमालोकादिपरामर्शानां परस्परजन्यानुमितौ व्यभिचारेणाकारणत्वव्यवहितोत्तरत्वविशिष्टानुमितित्वाव

च्छिन्नं प्रतितादृशपरामर्शानां हेतुत्वे गोरवमिप्यासत्तं। अनुमितित्वमनिवेश्य ज्ञानत्वनिवेशेन कारणत्वे लाघवसंभवसंभवात्। यदि च म
णिकारमते आपत्तेरग्राह्यतानिर्वाहाय याद्यव्यतिरेकविषयताशरीतरूपावच्छिन्नं प्रत्येव त्यक्तादृशनिश्चयत्वेन हेतुता वश्यकीति
मम्मते तदाघटादिप्रत्यक्षं प्रतिवन्ह्यभावानुमितिसामग्र्याः प्रतिबंधकत्वे तदवच्छेदककोटौ वह्निव्याप्यधूमवान्पर्वत इत्यादेस्तदभावव्याप्यव
त्तानिर्णयस्याभावो न निवेश्यते इति मणिकारमते लाघवं। न चैवं वह्निव्याप्यवत्तानिर्णयदशायां वन्ह्यभावानुमितिजनकपरामर्शादिसत्वे
घटादिप्रत्यक्षोत्पत्तौ बाधकाभावात्तत्र तादृशसामग्र्यभावहेतुतायां व्यभिचार इति वाच्यं। अव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन वह्निव्याप्यवत्ता
निर्णयविशिष्टान्यत्वस्य सामग्रीप्रतिबध्यतावच्छेदककोटौ निवेश्य व्यभिचारस्य वारणीयत्वात्। न चैवं वह्निव्याप्यवत्तानिर्णयसत्वे वन्ह्यभा
वानुमितिजनके तत्कारणसत्वे यद्वशाद्घटादिप्रत्यक्षोत्पत्तिः न एतादृशनिर्णयाभावघटितवन्ह्यभावानुमितिसामग्रीकालेपि सत्वात्तदु
पत्तिर्दुर्वारैवेति वाच्यं। अनुमितित्वमनिवेश्य धूमपरामर्शविशिष्टज्ञानत्वावच्छिन्नं प्रति धूमपरामर्शत्वेन हेतुत्वस्य कल्पनेन तादृशनिर्णयो
त्तरघटादिप्रत्यक्षस्यापि तत्कार्यतास्वीकारेण तादृशनिर्णयोत्तरं तादृशप्रत्यक्षसामग्रीमध्ये तथाविधनिर्णयस्यापि निवेशानीयत्वात्। एवं च धू
मलिंगकानुमितौ धूमपरामर्शत्वेन रूपेण कारणतानास्तीति गौरवं। आचार्यमते तु वह्निव्याप्यवत्तानिर्णयाभावघटितवन्ह्यभावानुमितिसा
मग्रीप्रतिबंधकतायां तादृशनिर्णयाभावस्यानिवेशेन तत्प्रतिबध्यतावच्छेदककोटौ व्यभिचारवारणार्थं तादृशनिर्णयविशिष्टान्यत्वनिवेशेऽ

पदर्शितापत्तेरिति घटादिप्रत्यक्षप्रतिताद्दशानिर्णयाभावे निवेश्यैव ताद्दशसामग्र्याः प्रतिबंधकत्वस्यावश्यकतया तत्रैतदकारणयोः सहविशे
ष्यविशेषणभावे विनिगमनाविरहेण सामग्रीप्रतिबंधकतावादे गुरुत्वप्रयुक्तगौरवं दुर्वारमिति। अपरे तु धूमपरामर्शविशिष्टानुमितित्वाव
च्छिन्नं प्रतिधूमपरामर्शत्वेन हेतुत्वे मणिकाराणां न गौरवं आचार्याणामपि धूमपरामर्शविशिष्टत्वस्य कार्यतावच्छेदककोटावावश्यकता
त्। नील पर्वतो वह्निव्याप्यधूमवानिति परामर्शदशायां नीलपर्वते वह्निमान्नप्रतिबंधकबाधसत्त्वे धूमवान्पर्वतो वह्निमानित्यनुमितिवार
णाय निरवच्छिन्नपर्वतत्वनिष्ठावच्छेदकतामावच्छेदकतानिरूपकविशेष्यतानिरूपितधूमप्रकारताशालिपरामर्शत्वेन हेतुत्वावश्यं तथा
सति दर्शितपरामर्शदशायां नीलो वह्न्यभाववानितीतरबाधदशायां धूमवान्पर्वतो वह्निमानित्यनुमित्युपपत्तये नीलपर्वतत्वावच्छिन्नवि
शेष्यकपरामर्शानामपि हेतुत्वमावश्यकमिति तेषां परस्परव्यभिचारवारणाय कारणतावच्छेदकतोत्तरत्वनिवेशनमावश्यकमेवेति। न चाचार्य
मते ताद्दशबाधस्थले ताद्दशानुमित्यपलाप एव समुचित इति वाच्यं। तथा सति घटादिप्रत्यक्षप्रतिनीलपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनु
मितिसामग्र्याः प्रतिबंधकतायां तदवच्छेदककोटौ नीलो वह्न्यभाववानिति बाधाभावनिवेशापत्त्या इतरकारणयोः सहतत्त्वविशेष्यविशेषण
भावे विनिगमनाविरहनिबंधनसामग्रीप्रतिबंधकतावादे त्वेन महागौरवापत्तेः। तत्र ताद्दशबाधाभाववानिवेशे ताद्दशबाधसत्त्वे नील पर्व
तो वह्निव्याप्यधूमवानिति परामर्शोत्तरितसामग्रीसत्त्वे अनुमित्सानुदयेन भिन्नविषयकप्रत्यक्षस्येवोत्पत्त्या सामग्रीप्रतिबंधकतायां व्यभिचा

ग॰टी॰ १० 10 रापत्तेः। अस्मन्मते तु तादृशबाधकालीनतन्नानुमितेरेवोक्तसामग्र्या भिन्नविषयकप्रत्यक्षानुदयाद्व्यभिचाराभावेन दर्शितसामग्रीप्रतिबंधकतायां तादृशमा
बाधाभावानिवेशे न लाघवादिति। ननु तादृशबाधकाले तादृशानुमित्युपगमेऽपि निरुक्तसामग्रीप्रतिबंधकतौ दृशबाधाभावोऽवश्यं निवेश्यः पं॰ता
अन्यथा नीलो वह्न्यभाववानिति बाधसत्त्वे नीलपर्वतो वह्निव्याप्यधूमवान्पर्वतश्च वह्निमानिति सिद्धिपरामर्शसत्त्वे कस्या अप्यनुमितेरनुत्प
सावृटप्रसक्तोऽस्वसामानदनुसादापत्तेः। तथा च बाधकाले निरुक्तसिद्ध्यसत्त्वे तादृशपरामर्शद्वयात्तद्वयप्रत्यक्षापत्तिवारणाय तादृशबाधाभा
वस्य निवेश्यपर्वतो वह्निमानिति सिद्ध्यभावं निवेश्य वह्निव्याप्यधूमवान्नीलपर्वत इत्यादिपरामर्शघटितसामग्र्याः घटादिप्रत्यक्षप्रतिबंधकत्वक
ल्पनेऽनन्तानुमितिवादिनामधिकमिति चेन्न। तदानीमनुमितिवादिमतेऽन्यानुमितिप्रतिवह्निव्याप्यवह्न्यभाववान्नीलकालीनवह्निव्याप्यधूम
वान्नीलपर्वतवान्पर्वत इति परामर्शत्वेन हेतुताकल्पनेन लाघवात्। तदानीं तत्र वह्निव्याप्यधूमप्रकारकनीलपर्वतत्वावच्छिन्नविशेष्यकपरा
मर्शावश्यकतया तद्बलाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्युत्पत्त्या पर्वते वह्निमनुमिनोमीत्यनुव्यवसायनिर्वाहात् वह्निव्याप्यधूमवान्नी
लपर्वत इति परामर्शस्य तादृशबाधाभावघटितमहाकार्यापेक्षया तादृशबाधदशायामनुमित्यनुपगमे तु दर्शितानुव्यवसायनिर्वाहार्थं पर्वतोद्दे
श्यकवह्निविधेयकानुमित्युत्पादानुरोधेन वह्निव्याप्यवह्न्यभाववान्नीलकालीनत्वविशिष्टतथाविधनीलपर्वतप्रकारकशुद्धपर्वतविशेष्यकप राम॰
रामर्शत्वेन पृथक् हेतुतापत्त्या घटादिप्रत्यक्षं प्रति तथाविधपरामर्शादिघटितसामग्र्याः पृथक्प्रतिबंधकतापत्त्या च महागौरवापत्तेः॥ तस्मान्नी १०

लो निर्वह्निरिति बाधकाले नीलपर्वतो वह्निव्याप्यधूमवानिति परामर्शाद् वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिः समुक्तिकैव। पर्वतो
वह्निव्याप्यधूमवानिति परामर्शोत्तरं तादृशानुमित्तौ तु न व्यभिचारः कारणाव्यवहितोत्तरत्वस्यैवात्राभिनिवेशात् विषयविषयितां तु न निवे
शप्रयोजनाभावात्। यदि तु वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इति परामर्शस्य वह्निव्याप्यवत्त्वाभाव
वन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमितिं प्रति स्वातन्त्र्येण हेतुत्वं वह्निव्याप्यवत्त्वाभावविशिष्टधूमवत्कालीनवह्नि
व्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इति परामर्शस्य स्वातन्त्र्येण तादृशानुमितिं प्रति हेतुत्वकल्पनलाघवात् तदा
नीं वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतप्रकारकस्य द्रुपर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्यावश्यकतया तद्दशायां वह्नि
व्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमित्युत्पत्तिस्स्यात्तदा पर्वते वह्निमनुमिनोमीत्यनुव्यवसायानिर्वाहे ऽनु
मितिं प्रति पूर्वोक्तपरामर्शस्य पृथक् हेतुत्वकल्पने प्रयोजनाभावात्। इदानीं वह्निव्याप्यधूमप्रकारकनीलपर्वतविशेष्यकपरामर्शाद् वह्निव्याप्यधूम
वान्पर्वतो वह्निमानित्यनुमित्यापत्तिस्तु न संभवति धूमधर्मितावच्छेदककवत्त्वाभावप्रकारकबाधबुद्धेस्तत्प्रतिबन्धिकायास्तदा सत्त्वात्। एवं घटादि
प्रसंगप्रति वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतप्रकारकपर्वतविशेष्यकपरामर्शघटितसामग्र्याः प्रतिबन्धकत्वे उपद
र्शितपरामर्शादिघटितसामग्र्याः स्वातन्त्र्यप्रतिबन्धकताकल्पनलाघवं। तथाविधपरामर्शकाले वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमव

ग·टी·
११

न्नीलपर्वतवान्पर्वत इत्यादिपरामर्शघटितसामग्र्याः आवश्यकत्वात्तद्बलादेव तदानीं घटस्य लक्षणाद्यभावोपपत्तेः तथा नीलो वन्ह्यभाववानिति बाधकाली
नवह्निव्याप्यधूमवान्नीलपर्वत इति परामर्शदशायां वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्युपगमे लाघवाभावात्। घटादिप्रत्यक्षसंप्रति पर्व
तो वह्निमानिति सिद्धाभाव घटितवह्निव्याप्यधूमप्रकारकनीलपर्वतविशेष्यकपरामर्शादिघटितसामग्र्याः अतिरिक्तानंतप्रतिबंधकताकल्पनगौ
रवाच्च तादृशबाधकालीनतादृशपरामर्शदशायां तथाविधानुमितिरेव न स्वीक्रियते इति व्यभिचारासंभवेन वह्निव्याप्यधूमवान्पर्वत इत्यादिपराम
र्शजन्यतावच्छेदककोटौ नकारणव्यवहितोत्तरत्वनिवेश इति सूक्ष्ममीक्ष्यते तदा वह्निव्याप्यधूमवान्पर्वतः तादृशधूमवद्व्य इत्याद्यनंतधर्मिता
वच्छेदकं निवेश्य पृथक्कारणत्वे महागौरवाद्धर्मितावच्छेदकरूपधर्मिघटितसामानाधिकरण्यपक्षरागद्वयावच्छिन्नैकात्मवृत्तित्वोभयसंबंधेन धूम
परामर्शविशिष्टवह्न्यनुमितिं प्रतिसमवायघटितसामानाधिकरण्यपधर्मितावच्छेदकताघटितसामानाधिकरण्योभयप्रत्यासत्त्या धूमपरामर्श
एकहेतुता कल्प्यते। एवमालोकादिपरामर्शादिष्वालोकादिपरामर्शादिवैशिष्ट्यं निवेश्येति चिंतामणिकारमते महालाघवं। आचार्यमते तु
धर्मितावच्छेदकभिन्नानंतधूमपरामर्शानां धूमवत्सर्वेतायुद्देश्यकवह्न्यनुमितीत्यादिकं प्रतिपृथक्कारणतायामतिमहागौरवं। उक्तरीत्या कार्यकार
णभावोपगमे तु तत एवाप्रलिंगकानुमितौ व्यभिचारवारणात्तदर्थपक्षतावच्छेदककोटौ लिंगभानमिति युक्तिशेषोऽपि स्यात्तत्र लिंगभानासिद्धेः राम·
श्री १ कारणद्वयानुगमकं च स्ववृत्तिप्रतियोगिकध्वंसवत्त्वस्वप्रतियोगित्वोभयसंबंधेन ध्वंसवदन्यत्वमिति प्राहुः। ननु परामर्शस्य लिंगस्य वा हेतुत्वमि ११

तिविनिगमनाविरहोऽज्ञायमानेपिसंभवतीत्यतो आचष्टे लिंगेति। परामृश्यमानेति। विशेषणतयाऽनुमितिपूर्वकालेविद्यमानतया। उपलक्षणा
विधया कारणतावच्छेदकत्वेपि तद्विशिष्टसत्त्वेव फलोपधानेतं ऽनुमित्युत्कोदास्यमानातिप्रसंगति। अतः फलोपधानप्रयोजकविशिष्टसत्ताकत्वंवि
शिष्टाधिकरणतागर्भकारणतानिर्वचनमिति व्यभिचारभयेन तादृशकारणतानुपगमेफलोपधीनप्रयोजकोपलक्षितसत्ताकेऽतिप्रसंगमाह
पद्धिविशिष्टेत्यादिना। तदानत्तस्यपरामर्शादितिमूलमर्थयित्वापरामर्शविषयस्येतिमूलार्थस्फुटयति। एवमिति। लिंगस्यविशेषणतात्वाकारणत्वं
निराकरोति। परामर्शेति। यथाश्रुतार्थः यथाश्रुतमूलार्थः। तदनुमितिकाले सत्त्वेपिसामान्यतोऽनुमितिकालेसत्त्वमक्षतमित्याहकालांतरेति
।तदानत्तस्येत्यादेर्यथाश्रुतार्थनिराकृत्यपरामर्शविषयस्येत्यादेस्तंनिराकरोतिपरामर्शेति। कारणतावच्छेदकत्वेविशेषस्येतितथाचनचेदमज्ञाप
मानेप्यत्तीतिदीधितेर्नचाज्ञायमानतादृशायामुक्तयुक्तिहृदयस्थितद्धकारणतावच्छेदकत्वमस्तीत्यर्थः। विशेषणतात्वाभिमानेनदूषणांतदन्नमि
तिस्फुटयतिइदमिति। विशेष्यविशेषणेति। साक्षात्परंपरासंबंधाभ्यां। हृदयमित्यस्याररसमूचनार्थ। विशिष्टनिरूपितविलक्षणसंबंधेनसत्वे
गेऽवाभावात्। एतच्चाग्रेस्फुटं। विद्यमानलिंगांतरमपिविद्यमानपक्षएवसंभावनीयंनतुभाविनिपक्षेइत्याशयेनमूलेभाविनीति अतीतेइत्य
प्याहारः वाशब्ददर्शनात्। व्यत्तैकमित्यस्योभयत्रान्वयः। भाविनीत्यस्यात्रविद्यमानेइतिवार्थः वाशब्दस्याऽप्यः। ब्राह्मणवशिष्टन्यायेनव्यत्तैकम
मित्येतदतीतपक्षमात्रपरंवा। व्यत्तैकमित्यसंगतं अन्येषामपिमात्रादिनिष्ठानांलिंगत्वसंभवादतः अन्यपदपर्यायैकशब्दानवकुद्धीत्यु

ग॰टी॰ न्नाभावप्रत्यक्षस्य कुत्सन्निमभिप्रेत्य व्याचष्टे विद्यमानान्यत्वं क्वचिदिति। विद्यमानत्वासंभवइति अनुमितिकालेइतिशेषः। विशेषणाविधयेति। तथा
१२ सति एकाम्योन्याभावविशिष्टापरामोन्याभाववत्त्वापितत्पक्षवृत्तित्वविशिष्टस्यानुमितिकाले विद्यमानत्वाभावाद्विद्यमानलिंगासंभवदूषणा
12 नुपपत्तेः। नन्वनुलिंगसमानकालीनत्वं त्वनुमितिर्जायते तत्तत्स्वभावविपक्षघटितसमानकालीनत्वमाने इष्टापत्तिरित्यतो मूले इति। ज्ञापमा
नत्वविशिष्टलिंगकालीनसाध्यमानामिप्रायकत्वेनार्थमाह अपरामृष्टेति। कारणतावच्छेदकविशिष्टसत्तायाआपादकत्वमित्याशयेन।
पलप्ये त्युक्तं। उपलक्षितसत्तायास्तथात्वे तदानीं परामर्शासत्त्वेपि तदापत्तेः। तत्कालीनो वर्तमानोपीति। ननु विद्यमानलिंगपरामर्शस्थ
लेनुमितेरतीतादिवह्निमानमारपमानत्वं वा कारणजनकतावच्छेदकलिंगविषयतायाः स्वावच्छिन्नाधिकरणतावच्छेदककालावच्छिन्नतद्वृत्तिष्टवानत्व
वपक्षवृत्त्यधिकरणताकत्वमेव भासते पक्षवृत्तिसाध्येनातदृशपक्षवृत्त्यधिकरणताकत्वमानेनुमितेर्भ्रमत्वापत्तेः। एवं च निरुक्तविद्यमानलिंगात्
तथाविधपक्षवृत्त्यधिकरणताकत्वमानं वाच्यं तथा च वह्नौ वर्तमानत्वमानापत्तिरसंगतैवेति चेन्न। दर्शितकालीनत्वसंसर्गावच्छिन्नलिंगवि
षयतायाभ्रमत्वाघटकत्वे पूर्वोल्लिखनतात्पर्यात्। इदानीं किंचिदधिकरणताघटितत्वसंसर्गावच्छिन्नलिंगविषयतायाभ्रमत्वाघटकत्वसं
पत्त्यापत्तिरसंगतेः। भावादिपक्षे अप्रसिद्ध्या निरुक्तलिंगकालीनत्वविषयताया मानासंभवेन विद्यमानवह्निविषयताया तद्घटकतामा रा॰म॰
लोच्यैवोक्तापादनादिति। मूले धूमासत्ताभावाभाववत्त्वमिति अत्यन्ताभावस्यान्यप्रतियोगिकत्वमतेनायमर्थ इति। अन्यतमत्वस्यैव प्रतियोगि १२

तावच्छेदकतत्तद्भेदप्रतियोगितावच्छेदकत्वे ऽप्येतादृशंकार्यतादूषणं तदवस्थमादृशत्रपि चेति भोद्येति। व्याप्तिग्रहकत्वे सति व्याप्यमनतिरिक्त
वृत्तित्वनिबंधनं व्याप्यतावच्छेदकत्वं। वस्तुतस्तु व्याप्यतावच्छेदकधर्मांतराघटितत्वे सति व्याप्तिग्रहकत्वमात्रं व्याप्यतावच्छेदकत्वे तन्नव्यनु
मितन्नधर्मिसंग्राहकस्य सामानाधिकरण्यमपि तत्र प्रविष्टं तथा सति परिभाषामात्रत्वापत्तेरिति धूमप्रागभाववत्त्वादेरप्यादेर्व्याप्यतावच्छेदकत्व
मेवेति स्वचपितु। तद्विशेषेति मूलं प्रमानुमितौ लिंगस्यान्यथासिद्धिपरंपरं चेत्प्रकारतात्वेनेति मूलस्य स्वोत्तरोत्पन्नभावानपेक्षत्वेनेत्यर्थः। तन्नि
श्चयासत्त्वनियमादिति। यत्तु विशिष्टवैशिष्ट्यविषयतायाः कारणतावच्छेदकत्वे व्याप्यभावप्रकारकं ज्ञानं जायतामितीच्छावशाद्याप्यंशेना
हार्यसंशयात्मकव्याप्तिविशिष्टवैशिष्ट्यबोधो दुर्वार इति तदंशे निश्चयत्वनिवेश आवश्यकः। न च तादृशेच्छासत्त्वे तद्घटितसामग्र्या बलवत्त्वा
द्व्याप्तिरेव न भासते इति न तत्संशयत्वं तत्रस्य संभवतीति वाच्यं। व्याप्तितदभावोभयप्रकारकं ज्ञानं जायतामितीच्छायां व्याप्तेरपि भानसंभवादिति
तन्न। विशिष्टवैशिष्ट्यबोधे संशयेच्छाविरहविशिष्टविशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतात्। अन्यथा प्रकारतावच्छेदकाभाववि
षयताया विशिष्टवैशिष्ट्यविषयतासामानाधिकरण्येन निश्चयत्वेन कारणतापात्तच्छेदप्रसंगात्। अन्यं प्रतीति। यस्य तदवच्छिन्नभिन्नवृत्ति
त्वधर्मितावच्छेदककोयद्धर्मावच्छिन्नपूर्ववर्तित्वप्रकारकग्रहस्तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नभिन्नपूर्ववर्तित्वेन तस्यान्यथासिद्धिरित्यर्थः।
प्रमाणाद्यार्थकेपि न क्षतिः। व्यवहारभेदस्येवोपपादनीयत्वादित्याशयेनाह अथवेति। संयोगत्वादिनेवेति। कालत्वेन कार्यसामान्ये हेतुत्वमेवत्त

कस्थ=१ न नूत्न्यलेहंद समवेतत्वविजातीयसंयोगनास्तस्यावेपि समवेतत्व समवेतत्वसमवेतत्वसंबंधेन हंडगतरूपेण रोसत्वेपि तस्य कारणतानिर्वाहसंभवसा क

ति=२ त्वाविरहात्प्रथमपक्षे च दोषाहानुपपत्तिरत आह अथवेति

तस्मात्त्वेन तु जनककार्यं प्रति आत्ममनःसंयोगस्य च जन्यात्मविशेषगुणोऽप्रतीतितस्मागः॥ ॥छ॥ ॥इति लिंगकरणता॥ छ॥ ॥९

श्लोक
८००